योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०४१

श्रीवसिष्ठ उवाच । ।।

तयोः प्रविष्टयोर्देव्योः पद्मसद्म बभूव तत् ।

चन्द्रद्वयोदयोद्द्योतधवलोदरसुन्दरम् ।। १ ।

कोमलामलसौगन्ध्यमृदुमन्दारमारुतम् । ।

तत्प्रभावेन निद्रालुनृपेतरनराङ्गनम् ।। २

सौभाग्यनन्दनोद्यानं विद्रुतव्याधिवेदनम् ।

सवसन्तं वनमिव फुल्लं प्रातीरवाम्बुजम्।। ३

तयोर्देहप्रभापूरैः शशिनिस्यन्दशीतलैः ।

आह्लादितोऽसौ बुबुधे राजोक्षित इवामृतैः ।। ४

आसनद्वयविश्रान्तं स ददर्शाप्सरोद्वयम् ।

मेरुशृङ्गद्वये चन्द्रबिम्बद्वयमिवोदितम् ।। ५

निमेषमिव संचिन्त्य स विस्मितमना नृपः ।

उत्तस्थौ शयनाच्छेषादिव चक्रगदाधरः ।। २

परिसंयमितालम्बिमाल्यहाराधराम्बरः ।

पुष्पाहार इवोत्फुल्लं जग्राह कुसुमाञ्जलिम् ।। ७

उपधानप्रदेशस्थात्स्वयं पटलकोटरात् ।

बद्धपद्मासनो भूमौ भूत्वोवाचेदमानतः ।। ८

जयतां जन्मदोस्थित्यदाहदोषशशिप्रभे ।

देव्यौ बाह्यान्तरतमोविद्रावणरविप्रभे ।। ९

तयोरुक्त्वेति तत्याज पादयोः कुसुमाञ्जलिम् ।

तीरद्रुमो विकसितः पद्मिन्यो पद्मयोरिव ।। १०

लीलायै भूपजन्माथ वक्तुं मन्त्रिणमीश्वरी ।

बोधयामास पार्श्वस्थं संकल्पेन सरस्वती ।। ११

प्रबुद्धोप्सरसौ दृष्ट्वा प्रणम्य कुसुमाञ्जलिम् ।

तयोः पादेषु संत्यज्य विवेश पुरतो नतः ।। १२

उवाच देवी हे राजन्कस्त्वं कस्य सुतः कदा ।

इह जात इति श्रुत्वा स मन्त्री वाक्यमब्रवीत् ।। १३

देव्यौ युष्मत्प्रसादोऽयं भवत्योरपि यत्पुरः ।

वक्तुं शक्नोमि तद्देव्यौ श्रूयेतां जन्म मत्प्रभोः ।। १४

आसीदिक्ष्वाकुवंशोत्थो राजा राजीवलोचनः ।

श्रीमान्कुन्दरथो नाम दोश्छायाच्छादितावनिः ।। १५

तस्याभूदिन्दुवदनः पुत्रो भद्ररथाभिधः ।

तस्य विश्वरथः पुत्रस्तस्य पुत्रो बृहद्रथः ।। १६

तस्य सिन्धुरथः पुत्रस्तस्य शैलरथः सुतः ।

तस्य कामरथः पुत्रस्तस्य पुत्रो महारथः ।। १७

तस्य विष्णुरथः पुत्रस्तस्य पुत्रो नभोरथः ।

अयमस्मत्प्रभुस्तस्य पुत्रः पूर्णामलाकृतिः ।। १८

अमृतापूरितजनः क्षीरोदस्येव चन्द्रमाः ।

महद्भिः पुण्यसंभारैर्विदूरथ इति श्रुतः ।। १९

जातो मातुः सुमित्राया गौर्या गुह इवापरः ।

पितास्य दशवर्षस्य दत्त्वा राज्यं वनं गतः ।। २०

पालयत्येष भूपीठं ततः प्रभृति धर्मतः ।

भवत्यावद्यसंप्राप्ते फलिते सुकृतद्रुमे ।। २१

देव्यौ दीर्घतपःक्लेशशतैर्दुष्प्रापदर्शने ।

इत्ययं वसुधाधीशो विदूरथ इति श्रुतः ।। २२

अद्य युष्मत्प्रसादेन परां पावनतां गतः ।

इत्युक्त्वा संस्थिते तूष्णीं मन्त्रिण्यवनिपे तथा ।। २३

कृताञ्जलौ नतमुखे बद्धपद्मासनेऽवनौ ।

राजन्स्मर विवेकेन पूर्वजातिमिति स्वयम् ।। २४

वदन्ती मूर्ध्नि पस्पर्श तं करेण सरस्वती ।

अथ हार्दं तमो मायापद्मस्य क्षयमाययौ ।। २५

सुविकासं च हृदयं ज्ञप्तिस्पर्शोदयेऽभवत् ।

सस्मार पूर्ववृत्तान्तमन्तः स्फुरदिव स्थितम् ।। २६

त्यक्तदेहैकराज्यत्वं लीलाविलसितान्वितम् ।

ज्ञात्वा प्रज्ञप्तिवृत्तान्तं लीलायास्तु विजृम्भितम् २७

आत्मोदन्तं बभूवासावुह्यमान इवार्णवे ।

उवाचात्मनि संसारे बत मायेयमातता ।। २८

परिज्ञाता प्रसादेन देव्योरिह मयाधुना ।

राजोवाच ।

हे देव्यौ किमिदं नाम दिनमेकं मृतस्य मे ।। २९

गतमद्येह जातानि वयो वर्षाणि सप्ततिः ।

स्मराम्यनेककार्याणि स्मरामि प्रपितामहम् ।। ३०

स्मरामि बाल्यं तारुण्यं मित्रं बन्धुपरिच्छदम् ।

ज्ञप्तिरुवाच ।

राजन्मृतिमहामोहमूर्च्छायाः समनन्तरम् ।। ३१

तस्मिँल्लोकान्तरेऽतीते तस्मिन्नेव मुहूर्तके ।

तस्मिन्नेव गृहे चास्मिन्नेव व्योम्न्यपि सद्मनि ।। ३२

अयं तस्य गृहस्यान्तर्व्योमन्येव किल स्थिते ।

गिरिग्रामकविप्रस्य गृहेऽन्तर्भूप मण्डपः ।। ३३

तस्यान्तरेऽयमाभाति प्रत्येकं च जगद्गृहम् ।

किल ब्राह्मणगेहान्तर्जीवस्ते मदुपास्थितः ।। ३४

तत्रैव तस्य भूपीठं तस्मिंश्च किल मण्डपे ।

तस्यैव च गृहस्यान्तरिदं संसारमण्डलम् ।। ३५

तन्नैवेदं तव गृहं स्थितमारम्भमन्थरम् ।

तत्रैव चेतसि तव निर्मलाकाशनिर्मले ।। ३६

प्रतिभामागतमिदं व्यवहारभ्रमाततम् ।

यथेदं नाम मे जन्म तथेक्ष्वाकुकुलं मम ।। ३७

एवंनामान एते मे पुराभूवन्पितामहाः ।

जातोऽहमभवं बालो दशवर्षस्य मे पिता ।। ३८

परिव्राड्विपिनं यात इह राज्येऽभिषिच्य माम् ।

ततो दिग्विजयं कृत्वा कृत्वा राज्यमकण्टकम् ।। ३९

अमीभिर्मन्त्रिभिः पौरैः पालयामि वसुन्धराम् ।

यज्ञक्रियाक्रमवतो धर्मे पालयतः प्रजाः ।। ४०

वयसः समतीतानि मम वर्षाणि सप्ततिः ।

इदं परबलं प्राप्तं मम दारुणविग्रहः ।। ४१

युद्धं कृत्वेदमायातो गृहमस्मिन्यथास्थितम् ।

इमे देव्यौ गृहे प्राप्ते ममैते पूजयाम्यहम् ।। ४२

पूजिता हि प्रयच्छन्ति देवताः स्वसमीहितम् ।

ममेयमेतयोरेका ज्ञानं जातिस्मृतिप्रदम् ।। ४३

इह दत्तवती देवी भाब्जस्येव विकासनम् ।

इदानीं कृतकृत्योऽस्मि जातोऽस्मि गतसंशयः ।। ४४

शाम्यामि परिनिर्वामि सुखमासे च केवलम् ।

इतीयमातता भ्रान्तिर्भवतो भूरिसंभ्रमा ।। ३

नानाचारविहाराढ्या सलोकान्तरसंचरा ।

यस्मिन्नेव मुहूर्ते त्वं मृतिमभ्यागतः पुरा ।। ४६

तदैव प्रतिभैषा ते स्वयमेवोदिता हृदि ।

एकामावर्तचलनां त्यक्त्वा दत्ते यथाऽपराम् ।। ४७

क्षिप्रमेव नदीवाहो वित्प्रवाहस्तथैव च ।

आवर्तान्तरसंमिश्रो यथावर्तः प्रवर्तते ।। ४८
कदाचिदेवं सर्गश्रीर्मिश्राऽमिश्रा च वर्धते ।
तस्मिन्मृतिमुहूर्ते ते प्रतिभानमुपागतम् ।। ४९
एतज्जालमसद्रूपं चिद्भानोः समुपस्थितम् ।
यथा स्वप्नमुहूर्तेऽन्तः संवत्सरशतभ्रमः ।। ५०
यथा संकल्पनिर्माणे जीवनं मरणं पुनः ।
यथा गन्धर्वनगरे कुड्यमण्डनवेदनम् ।। ५१
यथा नौयानसंरम्भे वृक्षपर्वतवेपनम् ।
यथा स्वधातुसंक्षोभे पूर्वपर्वतनर्तनम् ।। ५२
यथा समञ्जसं स्वप्ने स्वशिरःप्रविकर्तनम् ।
मिथ्यैवैवमियं प्रौढा भ्रान्तिराततरूपिणी ।। ५३
वस्तुतस्तु न जातोऽसि न मृतोऽसि कदाचन ।
शुद्धविज्ञानरूपस्त्वं शान्त आत्मनि तिष्ठसि ।। ५४
पश्यसीवैतदखिलं न च पश्यसि किंचन ।
सर्वात्मकतया नित्यं प्रकचस्यात्मनात्मनि ।।
महामणिरिवोदार आलोक इव भास्वरः ।
वस्तुतस्तु न भूपीठमिदं न च भवानयम् ।। ५६
न चेमे गिरयो ग्रामा न चैते न च वै वयम् ।
गिरिग्रामकविप्रस्य मण्डपाकाशके किल ।। ५७
तल्लीलाभर्तृदाराढ्यं जगदाभाति भास्वरम् ।
तत्र लीलाराजधानी मण्डपामण्डिताकृतिः ।। ५८
भाति तस्योदरे व्योम्नि तदेवं विदितं जगत् ।
तस्मिञ्जगति गेहेऽन्तर्यस्मिन्वयमिह स्थिताः ।। ५९
एवं तेषां मण्डपानां व्योमाव्योमैव निर्मलम् ।
तथैव मण्डपेष्वस्ति न मही न च पत्तनम् ।। ६०
न वनानि न शैलौघा न मेघसरिदर्णवाः ।

केवलं तत्र निःशून्ये विहरन्ति गृहे जनाः ।। ६१

न पश्यन्ति जना नापि पार्थिवा न च भूधराः ।

विदूरथ उवाच ।

एवं चेत्तत्कथं देवि ममेहानुचरा इमे ।। ६२

संपन्ना आत्मना सन्ति ते किमात्मनि नोऽथवा ।

जगत्स्वप्नार्थवद्भाति तस्य स्वप्ननरादयः ।। ६३

कथमात्मनि सत्याः स्युर्न सत्या वेति मे वद ।

श्रीसरस्वत्युवाच ।

राजन्विदितवेद्येषु शुद्धबोधैकरूपिषु ।। ६४

न किंचिदेतत्सद्रूपं चिद्व्योमात्मसु जागतम् ।

शुद्धबोधात्मनो भाति कृतो नाम जगद्भ्रमः ।। ६५

रज्ज्वां सर्पभ्रमे शान्ते पुनः सर्पभ्रमः कुतः ।

असद्भावे परिज्ञाते कुतः सत्ता जगद्भ्रमे ।। ६६

परिज्ञाते मृगजले पुनर्जलमतिः कुतः ।

स्वप्नकाले परिज्ञाते स्वे स्वप्नमरणं कुतः ।

स्वस्वप्ने स्वप्नमृतिभीरमृतस्यैव जायते ।। ६७

बुद्धस्य शुद्धस्य शरन्नभःश्रीः

स्वच्छावदातातितताशयस्य ।

अहं जगच्चेति कुशब्दकार्थो

न वस्तुतः सोऽङ्ग हि वाचिकं तत् ।। ६८

इत्युक्तवत्यथ मुनौ दिवसो जगाम

सायंतनाय विधयेऽस्तमिनो जगाम ।

स्नातुं सभा कृतनमस्करणा जगाम

श्यामाक्षये रविकरैश्च सहाजगाम ।। ६९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने भ्रान्तिविचारवर्णनं नामैकचत्वारिशः सर्गः

।। ४१ ।।

पञ्चमदिनम् ।